Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ राजमुखीमन्त्रविधानमुच्यते —

अज ऋषिः। अतिनिचृत् छन्दः। गौरी देवता। ह्रीं बीजम्। स्वाहा शक्तिः। क्लीं बीजं, श्रीं शक्तिरिति वा। ओं राजमुखि राजाधिमुखि हृत्। वश्यमुखि ह्रीं श्रीं क्लीं शिरः। देविदेवि शिखा। महादेवि कवचम्। देवादिदेवि नेत्रम्। सर्वजनस्य मुखं मम वशं कुरु कुरु स्वाहा अस्त्रम्। पूर्वमन्त्रध्यानवत् ध्यानम्। ओं राजमुखि राजाधिमुखि ह्रीं श्रीं क्लीं देवि देवि महादेवि *सर्वजनस्य मुखं मम वशं कुरु कुरु स्वाहा। इति मन्त्रः।* (अष्टत्रिंशदक्षरः।) राजवश्यप्रधानोयं मन्त्रः। अयुतं जपेत्। घृतसिक्तैः पयोन्नैः दशांशं पुरश्चरणाहोमः॥

अथ पूजा —

अत्रैव पूर्वोक्ते शाक्ते पीठे समावाह्य समर्चयेत्। अङ्गैः प्रथमावृतिः। मातृभिर्द्वितीया। इन्द्रादिभिस्तृतीया। अस्य मन्त्रस्य सर्वजन(स्येति)पदस्थाने साध्यनाम संयोजयेत्।

अथ प्रयोगः —

देवीध्माष्टशतं प्रसूनवदथ त्रिस्वादुयुक्तं हुनेत्
सप्ताहं भसितेन तेन विहितं पुण्यादिकं वश्यकृत्।

अयमर्थः — सप्तरत्नैर्दिव्याख्यगुग्गुलैः त्रिमधुरसिक्तैरष्टोत्तरशतं नित्यशस्सप्तदिनैर्हुनेत् । पुनस्तेन भस्मना पुण्ड्रं च कुर्यात् । तस्माद्वश्यकरम् ॥ देवी–श्रीदेवी–செங்கழுநீர்.

प्रयोगान्तरम् —

आज्यैस्तत्कृतहोमपातितसमाजप्तं घृतं प्राशयेत्
साध्यं निष्परिहारकं च तदिदं वश्यं भवेद्देहिनाम् ॥

अयमर्थः — आज्यैस्सहस्रं हुत्वा तत्संपातं च जप्त्वा साध्यं प्राशयेत् । तत्साध्यो वश्यो भवत्यवश्यम् ॥

प्रयोगान्तरम् —

शक्तिं साध्यर्क्षवृक्षप्रतिकृति हृदि संलिख्य संस्थाप्य जीवं
जप्त्वा खन्याङ्गणेऽस्मिन्विधिवदनलमाधाय पुष्पैर्जपायाः ।
देवीं मन्त्रेण रात्रौ दशपरशतसंख्यैस्तु काचन्दनाक्तैः
हुत्वा तां सप्तरात्रं सरिति निखनतामुत्तमं वश्यकर्म ॥

अयमर्थः — साध्यस्य नक्षत्रवृक्षेण प्रतिकृतिं संपाद्य तस्याः प्रतिमाया हृदि भुवनेशीं विलिख्य तत्र प्राणप्रतिष्ठां च कृत्वा मन्त्रं जप्त्वाऽङ्गणे निखन्य तस्या उपरि अग्निं संस्थाप्य देवीं संपूज्य अनेन मन्त्रेण रात्रौ जपाकुसुमैः काचन्दनाक्तैः दशोत्तरशतं नित्यशः सप्तदिनैर्हुनेत् । पुनस्तां प्रतिकृतिं नद्यां निखन्यात् । तस्मात्स साध्यो वशीभवेत् ॥